श्रीहनूमत्स्तोत्रम् ३

{॥ श्रीहनूमत्स्तोत्रम् ३ ॥}

श्रृणु देवि प्रवक्ष्यामि स्तोत्रं सर्वसुखावहम् ।
सर्वकामप्रदं नृणां हनुमत्स्तोत्रमुत्तमम् ॥ १॥

तप्तहाटकसङ्काशं नानापुष्पविराजितम् ।
उद्यद्बालार्कवदनं त्रिनेत्रं कुण्डलोज्ज्वलम् ॥ २॥

मौञ्जीकौपीनकं हेममययज्ञोपवीतिनम् ।
पिङ्गलाक्षं महाकायं टङ्कशैलेन्द्रधारिणम् ॥ ३॥

मूर्तित्रयात्मकं वीरं महाशौर्यं महाहनुम् ।
हनूमन्तं वायुसूनुं नमामि ब्रह्मचारिणम् ॥ ४॥

त्रिवर्णाक्षरमन्त्रस्थं जपाकुसुमसन्निभम् ।
नानाभूषणसंयुक्तमाञ्जनेयं नमाम्यहम् ॥ ५॥

पञ्चाक्षरस्थितं देवं नीलनीरदसन्निभम् ।
पूजितं सर्वदेवैस्तु राक्षसारिं नमाम्यहम् ॥ ६॥

अचलद्युतिसङ्काशं सर्वालङ्कारभूषितम् ।

षडक्षरयुतं देवं नमामि ब्रह्मचारिणम् ॥ ७॥

सप्तवर्णमयं देवं हरीशं तं सुरार्चितम् ।
सुन्दरास्याब्जसंयुक्तं त्रिनेत्रं तं नमाम्यहम् ॥ ८॥

अष्टादशाधिपं देवं हेमवर्णं महातनुम् ।
नमामि जगतां वन्द्यं लङ्काप्रासाददाहनम् ॥ ९॥

अतसीपुष्पसङ्काशं दशवर्णात्मकं विभुम् ।
जटाधरं चतुर्बाहुं नमामि कपिनायकम् ॥ १०॥

द्वादशाक्षरमन्त्रस्य नायकं कुन्तधारिणम् ।
हेमवर्णलसत्कायं भजे सुग्रीवमन्त्रिणम् ॥ ११॥

मालामन्त्रात्मकं देवं त्रिवर्णं च चतुर्भुजम् ।
पाशाङ्कुशधरं देवं कपिवर्यं नमाम्यहम् ॥ १२॥

त्रयोदशाक्षरहितं सीतादुःखनिवारणम् ।
सुरासुरगणैः सर्वैः संस्तुतं प्रणमाम्यहम् ॥ १३॥

हाहाकारमुखान्तनित्यदहनज्वालासमूहोज्ज्वलं
विद्वन्मण्डलजातरोषपरुषं श्रीरामदासं विभुम् ।

सञ्चूर्णीकृतधूम्रलोचनमहाह्यक्षादिरक्षोबलं

तं वन्दे रविधारणं सुरवरैर्वन्द्यं समीरात्मजम् ॥ १४॥

रघुपतिपदभक्तं किङ्किणीकोत्तमाङ्गं

मुकुलितकरपद्मं मोदयानं तरङ्गे ।

पुलकितविपुलाङ्गं पुण्यलीलानुषङ्गं

वनचरकुलनाथं वायुपुत्रं नतोऽस्मि ॥ १५॥

From Hanumatstutimanjari, Mahaperiaval Publication

Proofread by PSA Easwaran psaeaswaran at gmail

Please send corrections to sanskrit@cheerful.com

Last updated ्today

http://sanskritdocuments.org

Hanumath Stotram 3 Lyrics in Devanagari PDF
% File name : hanUmatstotram3.itx
% Location : doc_hanumaana
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : Processed by Sowmya Ramkumar
% Proofread by : PSA Easwaran psaeaswaran at gmail
% Description-comments : From Hanumatstutimanjari, Mahaperiaval Publication
% Latest update : September 19, 2014
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study

% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [October 13, 2015] at Stotram Website